# अव्ययप्रयोगः ଅବ୍ୟୟର ପ୍ରୟୋଗ

## द्वाविंशः पाठः

एषः कुमारः । कुमारः प्रातः उत्तिष्ठति । ततः दन्तमार्जनं करोति । अनन्तरं योगाभ्यासं करोति । ततः स्नानं करोति । यदा दर्पणं धरति । तदा प्रतिविम्बं पश्यति। प्रसाधनात् परं देवपूजां करोति। अथ पठनगृहं गच्छति। अन्यत्र न भ्रमति। यत्र पठति तत्र लिखति । अत्र पठनसमये कुत्र अपि न गच्छति । सः गृहपाठं लिखति पठति च । प्रतिदिनं वार्त्तापत्रिकां पठति । संस्कृतवार्ताम् अपि शृणोति । सः दिवा भक्तं खादति । सायं प्रार्थनां करोति । नक्तं रोटिकां खादति । अधुना प्रान्तरे खेलति। सः एव बालकः भवति । सः कुतः भयं न करोति। सर्वदा गुरुजनं नमति। एकदा सः देशभक्तः भविष्यति । सः सर्वत्र प्रशंसितः भवति ।

**शब्दार्थ :-** प्रातः -ସକାଳେ, उत्तिष्ठति-ଉଠେ, यदा–ଯେତେବେଳେ, तदा -ସେତେବେଳେ, अन्यत्र -ଅନ୍ୟଆଡେ, यत्र -ଯେଉଁଠାରେ, तत्र -ସେଠାରେ, अत्र -ଏଠାରେ, कुत्र -କେଉଁଠାରେ, अपि–ମଧ୍ୟ, च -ଓ /ଏବଂ, सर्वदा -ସବୁବେଳେ, वार्तापत्रिकाम्–ସମ୍ବାଦପତ୍ର, दिवा -ଦିନରେ, भक्तम्–ଭାତ, सायम्-ସନ୍ଧ୍ୟାରେ, नक्तम्–ରାତିରେ, रोटिकाम्–ରୋଟି, अधुना -ବର୍ତ୍ତମାନ, प्रान्तरे -ପଡିଆରେ, एव - ହିଁ, कुतः - କେଉଁଠାରୁ, एकदा - ଦିନେ, सर्वत्र- ସବୁଠାରେ, अथ- ଏହାପରେ, अनन्तरम्- ଏହାପରେ, प्रतिदिनम्- ସବୁଦିନ। ततः - ତାପରେ, परम् - ପରେ, प्रसाधनात् परम् - ବେଶଭୂଷା (ସଜବାଜ) ପରେ ।

### अभ्यासः- (ଅଭ୍ୟାସ)

१. शून्यस्थानं पूरयतु - (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

क) कुमारः .................. उत्तिष्ठति।

ख) ...........योगाभ्यासं करोति ।

ग) प्रसाधनात् परं ......करोति...... ।

घ) ..यत्र.... पठति तत्र ........... ।

ङ) सः दिवा .............. खादति ।

(अनन्तरं, भक्तं, लिखति, प्रातः, देवपूजाम्)

## २) स्तम्भं मेलयतु (ସ୍ତମ୍ଭ ମିଳାଅ)

| 'क' | 'ख' |
|---|---|
| एष: | पठति |
| यत्र | कुमार: |
| संस्कृतवार्त्तां | शृणोति |
| दिवा | लिखति |
| तत्र | खादति |

## ३) वाक्यं रचयतु (ବାକ୍ୟ ତିଆରି କର)

| | | |
|---|---|---|
| कुमार:<br>स:<br>एष: | प्रात:<br>सायम्<br>नक्तम्<br>अधुना<br>एव | उत्तिष्ठति<br>पठति<br>गच्छति<br>लिखति |

**ନିଜପାଇଁକାମ :** ଏହି ବିଷୟରୁ ୫ଟି ବାକ୍ୟ ମନେରଖି କୁହ।